# Siddhichandi Sahasrakshari Mahavidya Mantrah

# સિદ્ધિચણ્ડિકાસહસ્રાક્ષરીમહાવિદ્યામન્ત્રઃ

## Document Information

Text title : SiddhichandikAsahasrAkSharImahAvidyAmantraH

File name : siddhichaNDikAsahasrAkSharImahAvidyAmantraH.itx

Category : devii, devI, durgA, mantra

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2026

*sanskritdocuments.org*

Siddhichandi Sahasrakshari Mahavidya Mantrah

# સિદ્ધિચણ્ડિકાસહસ્રાક્ષરીમહાવિદ્યામન્ત્રઃ

વન્દે પરાગમવિદ્યાં સિદ્ધિચણ્ડીં સઙ્ગિતામ્ ।
મહાસપ્તશતીમન્ત્રસ્વરૂપાં સર્વસિદ્ધિદામ્ ॥

વિનિયોગઃ
ૐ અસ્ય સર્વવિજ્ઞાનમહારાજ્ઞી-સપ્તશતી-રહસ્યાતિરહસ્યમયી-
પરાશક્તિ-શ્રીમદાદ્યાભગવતી-સિદ્ધિચણ્ડિકા-સહસ્રાક્ષરી-
મહાવિદ્યામન્ત્રસ્ય શ્રીમાર્કણ્ડેય-સુમેધા ઋષિઃ,
ગાયત્ર્યાદિ નાનાવિધાનિ છન્દાંસિ, નવકોટિશક્તિયુક્તા શ્રીમદાદ્યાભગવતી
સિદ્ધિચણ્ડી દેવતા, શ્રીમદાદ્યાભગવતી સિદ્ધિચણ્ડી
પ્રસાદાદખિલેષ્ટાર્થે જપે વિનિયોગઃ ॥

ઋષ્યાદિ-ન્યાસઃ
શ્રીમાર્કણ્ડેય-સુમેધા ઋષિભ્યાં નમઃ શિરસિ ।
ગાયત્ર્યાદિ નાનાવિધાનિ છન્દેભ્યો નમઃ મુખે ।
નવકોટિશક્તિયુક્તા શ્રીમદાદ્યાભગવતી સિદ્ધિચણ્ડી દેવતાયૈ નમઃ હૃદિ ।
શ્રીમદાદ્યાભગવતી સિદ્ધિચણ્ડી પ્રસાદાદખિલેષ્ટાર્થે
જપે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

મહાવિદ્યા-ન્યાસઃ
ૐ શ્રીં નમઃ સહસ્રારે ।
ૐ હ્રેં નમઃ ભાલે ।
ક્લીં નમઃ નેત્રયુગલે ।
ૐ ઐં નમઃ કર્ણદ્વયે ।
ૐ સૌં નમઃ નાસાપુટદ્વયે ।
ૐ ૐ નમો મુખે ।
હ્રીં ૐ નમઃ કણ્ઠે ।
ૐ શ્રીં નમો હૃદયે ।

ૐ ઐં નમો હસ્તયુગે ।
ૐ ક્લેં નમઃ ઉદરે ।
ૐ સૌં નમઃ કટ્યામ્ ।
ૐ ઐં નમો ગુહ્યે ।
ૐ ક્લીં નમો જઙ્ઘાયુગલે ।
ૐ હ્રીં નમો જાનુદ્વયે ।
ૐ શ્રીં નમઃ પાદાદિસર્વાઙ્ગે ॥

ૐ યા માયા મધુકૈટભપ્રમથની, યા માહિષોન્મૂલની ।
યા ધૂમ્રેક્ષણચણ્ડમુણ્ડદલની, યા રક્તબીજાશની ।
શક્તિઃ શુમ્ભનિશુમ્ભદૈત્યમથની, યા સિદ્ધલક્ષ્મી પરા ।
સા દેવી નવકોટિમૂર્તિસહિતા માં પાતુ વિશ્વેશ્વરી ॥

ૐ ઐં હ્રીં શ્રીં હ્મૌં શ્રીં હ્રીં ક્લૌં ઐં સૌં ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌં ઐં ક્લીં હ્રીં શ્રીં ॥

જય જય મહાલક્ષ્મિ જગદાદ્યે બીજ-સુરાસુર-ત્રિભુવન-નિદાને
દયાઙ્કુરે સર્વતેજોરૂપિણિ મહામહામહિમે મહામહારૂપિણિ
મહામહામાયે મહામાયાસ્વરૂપિણિ વિરઞ્ચિસંસ્તુતે, વિધિવરદે
સચ્ચિદાનન્દે વિષ્ણુદેહવ્રતે મહામોહિનિ મધુકૈટભજિહ્વાસિનિ
નિત્યવરદાનતત્પરે, મહાસ્વાધ્યાયવાસિનિ મહામહાતેજોધારિણિ,
સર્વાધારે સર્વકારણકરણે અચિન્ત્યરૂપે, ઇન્દ્રાદિનિખિલનિર્જરસેવિતે,
સામગાનં ગાયન્તિ પૂર્ણોદયકારિણિ, વિજયે જયન્તિ અપરાજિતે સર્વસુન્દરિ
રક્તાંશુકે સૂર્યકોટિશશાઙ્કેન્દ્રકોટિસુશીતલે અગ્નિકોટિદહનશીલે
યમકોટિક્રૂરે વાયુકોટિવહનસુશીતલે, ૐકારનાદબિન્દુરૂપિણિ
નિગમાગમમાર્ગદાયિનિ, મહિષાસુરનિર્દલનિ ધૂમ્રલોચનવધપરાયણે
ચણ્ડમુણ્ડાદિશિરચ્છેદિનિ રક્તબીજાદિરુધિરશોષણિ
રક્તપાનપ્રિયે, મહાયોગિનિ ભૂતવૈતાલભૈરવાદિતુષ્ટિવિધાયિનિ
શુમ્ભનિશુમ્ભશિરચ્છેદિનિ, નિખિલાસુરબલખાદિનિ
ત્રિદશરાજ્યદાયિનિ સર્વસ્ત્રીરત્નરૂપિણિ દિવ્યદેહે નિર્ગુણે
સગુણે સદસદ્રૂપધારિણિ સુરવરદે ભક્તત્રાણતત્પરે, વરવરદે
સહસ્રાક્ષરે અયુતાક્ષરે સપ્તકોટિચામુણ્ડારૂપિણિ નવકોટિકાત્યાયનીરૂપે
અનેકલક્ષાલક્ષસ્વરૂપે ઇન્દ્રાગ્નિબ્રહ્માણિ રુદ્રાણિ ઈશાનિ ભ્રામરિ
ભીમે નારસિંહિ, ત્રયસ્ત્રિંશત્કોટિદૈવતે અનન્તકોટિબ્રહ્માણ્ડનાયિકે

ચતુરશીતિમુનિજનસંસ્તુતે, સપ્તકોટિમન્ત્રસ્વરૂપે મહાકાલે
રાત્રિપ્રકાશે કલાકાષ્ઠાદિરૂપિણિ ચતુર્દશભુવનભાવાવિકારિણિ
ગરુડગામિનિ ।

કોઙ્કાર હોઙ્કાર હ્રીઙ્કાર શ્રીઙ્કાર દલેઙ્કાર જૂંકાર
સૌઙ્કાર ઐઙ્કાર ક્લેઙ્કાર હ્રીઙ્કાર હ્રૌઙ્કાર હૌઙ્કાર
નાનાબીજકૂટનિર્મિતશરીરે નાનાબીજમન્ત્રરાગવિરાજતે,
સકલસુન્દરીગણસેવિતે કરુણારસકલ્લોલિનિ કલ્પવૃક્ષાધિષ્ઠિતે
ચિન્તામણિદ્વીપેઽવસ્થિતે મણિમન્દિરનિવાસે, ચાપિનિ ખડ્ગિનિ ચક્રિણિ
ગદિનિ શઙ્ખિનિ પદ્મિનિ નિખિલભૈરવાધિપતિસમસ્તયોગિનીપરિવૃતે,
કાલિ કઙ્કાલિ તોરતોતલે સુતારે જ્વાલામુખિ છિન્નમસ્તકે ભુવનેશ્વરિ,
ત્રિપુરે લોકજનનિ વિષ્ણુવક્ષઃસ્થલાલઙ્કારિણિ, અજિતે અમિતે અમરાધિપે
અનુપસરિતે ગર્ભવાસાદિદુઃખાપહારિણિ મુક્તિક્ષેમાધિષયનિ શિવે
શાન્તિકુમારિ દેવિ, સૂક્તદશશતાક્ષરે ચણ્ડિ ચામુણ્ડે મહાકાલિ
મહાલક્ષ્મિ મહાસરસ્વતિ ત્રયીવિગ્રહે ।

પ્રસીદ પ્રસીદ સર્વમનોરથાન્ પૂરય પૂરય ।
સર્વારિષ્ટવિઘ્નં છેદય છેદય ।
સર્વગ્રહપીડાજ્વરોગ્રભયં વિધ્વંસય વિધ્વંસય ।
સર્વત્રિભુવનજાતં વશય વશય ।
મોક્ષમાર્ગં દર્શય દર્શય ।
જ્ઞાનમાર્ગં પ્રકાશય પ્રકાશય ।
અજ્ઞાનતમો નાશય નાશય ।
ધનધાન્યાદિ કુરુ કુરુ ।
સર્વકલ્યાણાનિ કલ્પય કલ્પય ।
માં રક્ષ રક્ષ ।
સર્વાપદ્ભ્યો નિસ્તારય નિસ્તારય ।
મમ વજ્રશરીરં સાધય સાધય ।
ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે નમોઽસ્તુ તે સ્વાહા ॥

—

ૐ ઐં હ્રીં ક્લીં નમો દૈવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥ ૧॥

ૐ ઐં હ્રીં શ્રીં સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુ તે ॥ ૨॥

સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુ તે ॥ ૩॥

સિદ્ધિચણ્ડીમહામન્ત્રં યઃ પઠેત્ પ્રયતો નરઃ ।
સર્વસિદ્ધિમવાપ્નોતિ સર્વત્ર વિજયી ભવેત્ ॥ ૪॥

સઙ્ગ્રામેષુ જયેત્ શત્રૂન્ માતઙ્ગમિવ કેસરી ।
વશયેત્ સદા નિખિલાન્ વિશેષેણ મહીપતીન્ ॥ ૫॥

ત્રિકાલં યઃ પઠેન્નિત્યં સર્વૈશ્વર્યપુરઃસરમ્ ।
તસ્ય નશ્યન્તિ વિઘ્નાનિ ગ્રહપીડાશ્ચ વારણમ્ ॥ ૬॥

પરાભિચારશમનં તીવ્રદારિદ્ર્યનાશનમ્ ।
સર્વકલ્યાણનિલયં દેવ્યાઃ સન્તોષકારકમ્ ॥ ૭॥

સહસ્રાવૃત્તિતસ્તુ દેવિ મનોરથસમૃદ્ધિદમ્ ।
દ્વિસહસ્રાવૃત્તિતસ્તુ સર્વસઙ્કટનાશનમ્ ॥ ૮॥

ત્રિસહસ્રાવૃત્તિતસ્તુ વશયેદ્રાજયોષિતમ્ ।
અયુતં પ્રપઠેદ્યસ્તુ સર્વત્ર ચૈવાતન્દ્રિતઃ ।
સ પશ્યેચ્ચણ્ડિકાં સાક્ષાદ્વરદાનકૃતોદ્યમામ્ ॥ ૯॥

ઇદં રહસ્યં પરમં ગોપનીયં પ્રયત્નતઃ ।
વાચ્યં ન કસ્યચિત્ દેવિ વિધાનમસ્તુ સુન્દરિ ॥ ૧૦॥

॥ ઇતિ શ્રીસિદ્ધિડામરે શિવદેવીસંવાદે સહસ્રાક્ષરં
સિદ્ધિચણ્ડીમહાવિદ્યોત્તમં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Durga Sharma

*Siddhichandi Sahasrakshari Mahavidya Mantrah*
pdf was typeset on June 23, 2026

Please send corrections to *sanskrit@cheerful.com*